# Shri Hayagriva Ashtottarashatanamastotram

# શ્રીહયગ્રીવાષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : hayagrIvAShTottarashatanAmastotram

File name : hayagrIvAShTottarashatanAmastotram.itx

Category : aShTottarashatanAma, vishhnu, vishnu_misc, vishnu

Location : doc_vishhnu

Author : Traditional

Transliterated by : Ankur Nagpal ankurnagpal108 at gmail.com

Proofread by : Ankur Nagpal ankurnagpal108 at gmail.com, NA, Natarajan

Description-comments : shatanAmastotrasangraha, Gita Press

Acknowledge-Permission: Gitapress, Gorakhpur

Latest update : April 7, 2016

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# શ્રીહયગ્રીવાષ્ટોત્તરશતનામસ્તોત્રમ્

અથ વિનિયોગઃ -
ૐ અસ્ય શ્રીહયગ્રીવસ્તોત્રમન્ત્રસ્ય સઙ્કર્ષણ ઋષિઃ,
અનુષ્ટુપ્છન્દઃ, શ્રીહયગ્રીવો દેવતા ઋં બીજં
નમઃ શક્તિઃ વિદ્યાર્થે જપે વિનિયોગઃ ॥

અથ ધ્યાનમ્ -
વન્દે પૂરિતચન્દ્રમણ્ડલગતં શ્વેતારવિન્દાસનં
મન્દાકિન્યમૃતાબ્ધિકુન્દકુમુદક્ષીરેન્દુહાસં હરિમ્ ।
મુદ્રાપુસ્તકશઙ્ખચક્રવિલસચ્છ્રીમદ્ભુજામણ્ડિતમ્
નિત્યં નિર્મલભારતીપરિમલં વિશ્વેશમશ્વાનનમ્ ॥

અથ મન્ત્રઃ -
ૐ ઋગ્યજુઃસામરૂપાય વેદાહરણકર્મણે ।
પ્રણવોદ્ગીથવચસે મહાશ્વશિરસે નમઃ ॥

શ્રીહયગ્રીવાય નમઃ ।

અથ સ્તોત્રમ્ -
જ્ઞાનાનન્દમયં દેવં નિર્મલં સ્ફટિકાકૃતિમ્ ।
આધારં સર્વવિદ્યાનાં હયગ્રીવમુપાસ્મહે ॥ ૧॥

હયગ્રીવો મહાવિષ્ણુઃ કેશવો મધુસૂદનઃ ।
ગોવિન્દઃ પુણ્ડરીકાક્ષો વિષ્ણુર્વિશ્વમ્ભરો હરિઃ ॥ ૨॥

આદીશઃ સર્વવાગીશઃ સર્વાધારઃ સનાતનઃ ।
નિરાધારો નિરાકારો નિરીશો નિરુપદ્રવઃ ॥ ૩॥

નિરઞ્જનો નિષ્કલઙ્કો નિત્યતૃપ્તો નિરામયઃ ।
ચિદાનન્દમયઃ સાક્ષી શરણ્યઃ સર્વદાયકઃ ॥ ૪॥ શુભદાયકઃ
શ્રીમાન્ લોકત્રયાધીશઃ શિવઃ સારસ્વતપ્રદઃ ।

વેદોદ્ધર્ત્તાવેદનિધિર્વેદવેદ્યઃ પુરાતનઃ ॥ ૫॥

પૂર્ણઃ પૂરયિતા પુણ્યઃ પુણ્યકીર્તિઃ પરાત્પરઃ ।
પરમાત્મા પરઞ્જ્યોતિઃ પરેશઃ પારગઃ પરઃ ॥ ૬॥

સકલોપનિષદ્વેદ્યો નિષ્કલઃ સર્વશાસ્ત્રકૃત્ ।
અક્ષમાલાજ્ઞાનમુદ્રાયુક્તહસ્તો વરપ્રદઃ ॥ ૭॥

પુરાણપુરુષઃ શ્રેષ્ઠઃ શરણ્યઃ પરમેશ્વરઃ ।
શાન્તો દાન્તો જિતક્રોધો જિતામિત્રો જગન્મયઃ ॥ ૮॥

જરામૃત્યુહરો જીવો જયદો જાડ્યનાશનઃ । ગરુડાસનઃ
જપપ્રિયો જપસ્તુત્યો જપકૃત્પ્રિયકૃદ્વિભુઃ ॥ ૯॥

var જયશ્રિયોર્જિતસ્તુલ્યો જાપકપ્રિયકૃદ્વિભુઃ
વિમલો વિશ્વરૂપશ્ચ વિશ્વગોપ્તા વિધિસ્તુતઃ । વિરાટ્ સ્વરાટ્
વિધિવિષ્ણુશિવસ્તુત્યઃ શાન્તિદઃ ક્ષાન્તિકારકઃ ॥ ૧૦॥

શ્રેયઃપ્રદઃ શ્રુતિમયઃ શ્રેયસાં પતિરીશ્વરઃ ।
અચ્યુતોઽનન્તરૂપશ્ચ પ્રાણદઃ પૃથિવીપતિઃ ॥ ૧૧॥

અવ્યક્તો વ્યક્તરૂપશ્ચ સર્વસાક્ષી તમોહરઃ ।
અજ્ઞાનનાશકો જ્ઞાની પૂર્ણચન્દ્રસમપ્રભઃ ॥ ૧૨॥

જ્ઞાનદો વાક્પતિર્યોગી યોગીશઃ સર્વકામદઃ ।
યોગારૂઢો મહાપુણ્યઃ પુણ્યકીર્તિરમિત્રહા ॥ ૧૩॥

વિશ્વસાક્ષી ચિદાકારઃ પરમાનન્દકારકઃ ।
મહાયોગી મહામૌની મુનીશઃ શ્રેયસાં નિધિઃ ॥ ૧૪॥

હંસઃ પરમહંસશ્ચ વિશ્વગોપ્તા વિરટ્ સ્વરાટ્ ।
શુદ્ધસ્ફટિકસઙ્કાશઃ જટામણ્ડલસંયુતઃ ॥ ૧૫॥

આદિમધ્યાન્તરહિતઃ સર્વવાગીશ્વરેશ્વરઃ ।
પ્રણવોદ્ગીથરૂપશ્ચ વેદાહરણકર્મકૃત્ ॥ ૧૬॥

નામ્નામષ્ટોત્તરશતં હયગ્રીવસ્ય યઃ પઠેત્ ।
સ સર્વવેદવેદાઙ્ગશાસ્ત્રાણાં પારગઃ કવિઃ ॥ ૧૭॥

ઇદમષ્ટોત્તરશતં નિત્યં મૂઢોઽપિ યઃ પઠેત્ ।
વાચસ્પતિસમો બુદ્ધ્યા સર્વવિદ્યાવિશારદઃ ॥ ૧૮॥

મહદૈશ્વર્યમાપ્નોતિ કલત્રાણિ ચ પુત્રકાન્ ।
નશ્યન્તિ સકલાન્ રોગાન્ અન્તે હરિપુરં વ્રજેત્ ॥ ૧૯॥

॥ ઇતિ શ્રીબ્રહ્માણ્ડપુરાણે શ્રીહયગ્રીવાષ્ટોત્તરશતનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Ankur Nagpal ankurnagpal108 at gmail.com

*Shri Hayagriva Ashtottarashatanamastotram*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*